. आदर्श उत्तराणि
सत्र – 2025–2026
कक्षा – अष्टमी (8वी)
(विषयकोड – 0805)
विषयः – ज्योतिषम् (मुहुर्तचिन्तामणिः)

प्रश्नः 01 – विकल्पात्मकाः प्रश्नाः – 5

उत्तराणि –
क – (ब) ब्रह्मा।
ख – (ब) भद्रा।
ग – (अ) प्रतिपदा – द्वितीया।
घ – (द) दग्धयोगः।
ङ – (स) चन्द्रमा।

प्रश्नः – 02 अधोलिखितानि रिक्तस्थानानि कोष्ठकात् उचितं विकल्पं चित्वा लिखत ? 5

उत्तराणि –
क – मृदु।
ख – अधोमुखानि।
ग – क्रये।
घ – अन्धाक्षम्।
ङ – घोरा ।

प्रश्नः – 03 समुचितं युग्ममेलनं कुरूत – 5

उत्तराणि –
क – (उ) ध्वांक्षी नामक।
ख – (ई) षडशीतिमुखनामक।
ग – (अ) सम संज्ञकानि भवन्ति।
घ – (आ) सुप्ता ।
ङ – (इ) विद्धः (अशुभः)।

प्रश्नः – 04 सत्यकथनानां समक्षं 'सत्यम्' असत्य कथनानां समक्षं च 'असत्यम' इति लिखत ? 5

उत्तराणि –
क – सत्यम् ।
ख – सत्यम्।
ग – सत्यम् ।
घ – असत्यम्।
ङ – सत्यम्।

प्रश्नः – 05 निम्नलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत ? 5

उत्तराणि –
क – बालो यदि षष्ठे मासे सदशनो भवति चेत् तस्य फलं सुभोगं अतुलभोगं वा भवति।
ख – बालिकायाः अन्नप्राशनसंस्कारः पंचमे मासे शुभयोगेषु करणीयः।

ग – बालकस्य मुण्डनसंस्कारः तृतीये वर्षे करणेन शुभो भवति।

घ – जातकस्य अक्षरारम्भसंस्कारः तृतीये वर्षे करणेन शुभो भवति।

ङ – जातकस्य केशान्तसंस्कारः षोडशे वर्षे करणेन शुभफलप्रदो भवति।

अतिलघूत्तरीयप्रश्नाः –

**प्रश्नः 06 – क्रमानुसारं तिथिस्वामीनां वर्णनं कुरूत ?** 02

उत्तरम् – प्रतिपदा तिथितः आरभ्य क्रमशः अग्निः, ब्रह्मा, गौरी, गणेशः, सर्पः, कार्तिकेयः, सूर्यः, शिवः, दुर्गा, यमः, विश्वेदेवः, विष्णुः, कामदेवः, शिवः, चन्द्रश्च तिथीनां स्वामिनः भवन्ति। यथोक्तम्–

तिथीशा वह्निकौ गौरी गणेशोऽहिर्गुहो रविः।
शिवो दुर्गान्तको विश्वे हरिः कामः शिवः शशी।।

**प्रश्नः 07 – मर्त्यलोके भद्रावासः कदा भवति ?** 02

उत्तरम् – चन्द्रः यदा कर्क–सिंह–कुम्भ–मीनराशिषु भवति तदा भद्रा मर्त्यलोके भवति।

**प्रश्नः 08 – चरसंज्ञकानि कानि नक्षत्राणि भवन्ति ?** 02

**उत्तरम् – चरसंज्ञकानि नक्षत्राणि** – स्वाती, पुनर्वसु, श्रवण, धनिष्ठा, शतभिषा नक्षत्राणि तथा सोमवासरः चरसंज्ञको भवति। एतेषु गजारोहणम् अश्वारोहणं पुष्पवाटिकादि निर्माणं तथा यात्रादि कार्याणि तथा च लघुसंज्ञकनक्षत्रेषु उक्तानि कार्याणि शुभानि भवन्ति।

**प्रश्नः09 – बीजगेहशान्त्यारामादि कर्माणि केषु नक्षत्रेषु करणेन सिद्धानि भवन्ति ?** 02

उत्तरम् – **ध्रुवसंज्ञकनक्षत्राणि** – उत्तराफाल्गुनी, उत्तराषाढ़ा, उत्तराभाद्रपद, रोहिणीनक्षत्राणि तथा च रविवासरः ध्रुवसंज्ञकः स्थिरसंज्ञको भवति। एतेषु स्थिरकर्माणि यथा गृहारम्भः, बीजवपनं, ग्रहादिशान्तिकर्माणि, उद्यानादि निमार्णकार्याणि च सिद्धानि भवन्ति।

**प्रश्नः 10 – बृहत्संज्ञकनक्षत्रेषु सूर्यसंक्रान्तिः भवति चेत् मुहूर्तकालं कति भवति ?** 02

उत्तरम् – बृहत्संज्ञकनक्षत्रेषु सूर्यसंक्रान्तिः भवति चेत् पंचचत्वारिंशत मुहूर्तं यावत् मुहूर्तकालं भवति।

**प्रश्नः 11 – नवताराणां नामानि लिखत ?** 02

उत्तरम् – जन्मनक्षत्रात् दिवसनक्षत्रपर्यन्तं या संख्या भवति तस्यां नवसंख्यया आप्तकरणेन शेषसंख्या यदि एकं भवति चेत् 1 जन्मतारा, द्वयं भवति चेत् 2 सम्पत्तारा, एवमेव क्रमेण 3 विपत्, 4 क्षेम, 5 प्रत्यरि, 6 साधक, 7 वध, 8 मैत्र, 9 अतिमैत्रं च एताः नवताराः भवन्ति।

**प्रश्नः 12 – गर्भकालीन दशमासानां स्वामिनः के तेषां नामानि लिखत ?** 02

उत्तरम् – गर्भाधानसमयात् क्रमशः दशमासानां मासाधिपः शुक्रः, मङ्गलः, गुरूः, रविः, चन्द्रमा, शनिः, बुधः, लग्नेशः, चन्द्रमा, सूर्यश्च भवन्ति। विवाहे गर्भादिसंस्कारे च स्त्रीणां चन्द्रबलम् अन्यकार्येषु च तस्याः स्वामेः चन्द्रबलं द्रष्टव्यं भवति।

लघूत्तरीयप्रश्नाः –

**प्रश्नः 13 – आनन्दादि अष्टाविंशतियोगानां नामानि लिखत ?** 03

उत्तरम् – आनन्दः, कालदण्डः, धूम्रः, धाता, सौम्यः, ध्वांक्षः, केतु', श्रीवत्सः, वज्रः, मुद्गरः, छत्रं, मित्रं, मानसः, पद्मः, लुम्बः, उत्पातः, मृत्युः, काणः, सिद्धिः, शुभः, अमृतम्, मुसलं, गदः, मातंगः, रक्षः, चरः, सुस्थिरः, प्रवर्द्धमानश्च एतानि अष्टाविंशति योगानि भवन्ति। एतेषां योगानां नामानुसारमेव फलं भवति।

अथवा

**प्रश्नः – दोषनाशक–रवियोगः कदा भवति इति स्पष्टयत ?**

**उत्तरम्** – सूर्यः यस्मिन् नक्षत्रे भवति तस्मात् नक्षत्रात् चन्द्रः यस्मिन् नक्षत्रे अस्ति तत् पर्यन्तम् अर्थात् दिवसनक्षत्रर्यन्तं गणनाकरणेन यदि संख्या 4, 9, 6, 10, 13, 20 आगच्छति चेत् तदा रवियोगः भवति। योगोऽयं दोषसमूहानां नाशं करोति। उक्तं च –

सूर्यभाद् वेदगोतर्कदिग्विश्वनखसम्मिते।
चन्द्रर्क्षे रवियोगाः स्युदोर्षसङ्घविनाशकाः।।

**प्रश्नः 14 – नक्षत्रसहितं नक्षत्रस्वामीनां वर्णनं कुरूत ?** **03**

उत्तरम् – निम्नसारिणी अनुसारं नक्षत्राणां तेषां स्वामीनां च विवेचनं कृतमस्ति –

| स. क्र. | नक्षत्रनामानि | नक्षत्रस्वामीनां नामानि |
|---|---|---|
| 1 | अश्विनी | अश्विनीकुमारौ |
| 2 | भरणी | यमराजः/अन्तकः |
| 3 | कृत्तिका | अग्निः |
| 4 | रोहिणी | ब्रह्मा |
| 5 | मृगशिरा | चन्द्रमा |
| 6 | आर्द्रा | शिवः |
| 7 | पुनर्वसु | अदितिः |
| 8 | पुष्य | बृहस्पतिः |
| 9 | आश्लेषा | सर्पः |
| 10 | मघा | पितरः |
| 11 | पूर्वाफाल्गुनी | भगः |
| 12 | उत्तराफाल्गुनी | अर्यमा |
| 13 | हस्त | सूर्यः |
| 14 | चित्रा | त्वष्टा |
| 15 | स्वाती | पवनः |
| 16 | विशाखा | इन्द्राग्नि |
| 17 | अनुराधा | मित्रः |
| 18 | ज्येष्ठा | इन्द्रः |
| 19 | मूल | राक्षसः |
| 20 | पूर्वाषाढ़ा | जलदेवः |
| 21 | उत्तराषाढ़ा | विश्वेदेवः |
| 22 | अभिजित | विधिः |
| 23 | श्रवण | विष्णुः |
| 24 | धनिष्ठा | वसुः |
| 25 | शतभिषा | वरूणः |
| 26 | पूर्वाभाद्रपदा | अजपादः |
| 27 | उत्तराभाद्रपदा | अहिर्बुधन्यः |
| 28 | रेवती | पूषा |

**अथवा**

**प्रश्नः – बीजवपनमुहूर्त–वर्णनसहितं राहुवसात् बीजोप्तेः शुभाऽशुभत्वस्य वर्णनं कुरूत ?**

**उत्तरम्** – श्रवण–शतभिषा–पुनर्वसु विशाखा नक्षत्राणि विहाय मूल–मघा तथा चरसंज्ञकेषु ध्रुवसंज्ञकेषु, मृदुसंज्ञकेषु, क्षिप्रसंज्ञकेषु, च नक्षत्रेषु रविभौमशनिवासरंच विहाय शुभवासरेषु, पापग्रहाणां बलहीने सति, जलचरराशिनवांशस्थिते चन्द्रे, चन्द्रे शुक्रे बलयुक्ते, लग्ने गुरौ स्थिते बीचवपनं शुभो भवति। सिंह–कुम्भ–कर्क–मेष– मकर–तुला लग्नेषु तथा रिक्तां षष्ठीं तिथिं च विहाय बीजवपनं करणीयम्।

राहुवशात बीजोत्पत्तिः –

राहुः यस्मिन् नक्षत्रे स्थितो भवति तस्मात् नक्षत्रात् क्रमशः अष्टनक्षत्राणि अशुभानि, नक्षत्रत्रयं शुभम्, एकमशुभम्, त्रीणि नक्षत्राणि शुभानि, एकमशुभम्, त्रीणि शुभानि, एकमशुभम्, त्रीणि शुभानि, चत्वारि च नक्षत्राणि अशुभानि भवन्ति।

**प्रश्नः 15 – कानि समसंज्ञक–बृहत्संज्ञक–जघन्यसंज्ञकनक्षत्राणि इति लिखत ?** **03**

उत्तरम् – मृदुसंज्ञकानि क्षिप्रसंज्ञकानि नक्षत्राणि तथा धनिष्ठा–श्रवण–कृत्तिका–मघा पूर्वात्रयाणि च नक्षत्राणि समसंज्ञकानि भवति। ध्रुवसंज्ञकानि नक्षत्राणि तथा विशाखा–पुनर्वसु च बृहत्संज्ञकानि नक्षत्राणि भवन्ति। आश्लेषा–शतभिषा–आर्द्रा–स्वाती–ज्येष्ठा–भरणी च एतानि जघन्यसंज्ञकानि नक्षत्राणि भवन्ति।

अथवा

**प्रश्नः –घोरा–ध्वांक्षी–महोदरी–मन्दाकिनी–मन्दा–मिश्रा–राक्षसी च संस्क्रान्तीनां फलसहितं विवेचनं कुरूत?**

उत्तरम् –

घोरा – उग्रसंज्ञकनक्षत्रेषु रविवासरे च सूर्यसंक्रान्तिः भवति चेत् घोरानामकसंङ्क्रान्तिः भवति। इयं शूद्राणां कृते सुखकारी भवति।

ध्वांक्षी – लघुसंज्ञकनक्षत्रेषु सोमवासरे च संक्रान्तिः भवति चेत् ध्वांक्षी नामकसंक्रान्तिः भवति। इयं वैश्यानां कृते सुखकरी भवति।

महोदरी – चरसंज्ञकनक्षत्रेषु भौमवासरे च सूर्यसंक्रान्तिः भवति चेत् महोदरी नामकसंक्रान्तिः भवति। इयं चौरान् सुखं प्रददाति।

मन्दाकिनी – मैत्रसंज्ञकनक्षेषु बुधवासरे च सूर्यसंक्रान्तिः भवति चेत् मन्दाकिनी नामकसंक्रान्तिः भवति। इयं क्षत्रियान् सुखमावहति।

मन्दा – स्थिरसंज्ञकनक्षत्रेषु गुरूवासरे च सूर्यसंक्रान्तिः मन्दानामकसंक्रान्तिः भवति। इयं ब्राह्मणान् तोषयति।

मिश्रा – मिश्रसंज्ञकनक्षत्रेषु शुक्रवासरे च मिश्रानामकसूर्यसंक्रान्तिः भवति। इसं पशून् सुखमावहति।

राक्षसी – तीक्ष्णसंज्ञकनक्षत्रेषु शनिवासरे च राक्षसीनामकसूर्यसंक्रान्तिः भवति। इयमत्यजानां कृते सुखकरी भवति।

**प्रश्नः 16 – चन्द्रमसः अवस्थानां साधनपूर्वकं तासां नामानि लिखत ?** 03

उत्तरम् – षष्टिगुणितगतनक्षत्रसंख्यायां वर्तमाननक्षत्रस्य भुक्तघटीन् योजयित्वा योगफले चतस्त्रः संख्यायाः पुनः गुणनकरणेन यद् गुणनफलमागच्छति तस्मिन् फले पुनः (45) पंचचत्वारिंशत् संख्यया आप्तकार्यं करणीयम्, आप्तकार्येण यल्लब्धिः प्राप्तः तस्मिन् पुनः 12 द्वादशसंख्यया भागं करणीयं तेन यद् शेषमागच्छति सा मेषादिराशिस्थितचन्द्रमायाः भुक्तावस्था भवति। एकादि शेष माध्यमेन एताः चन्द्रस्य द्वादशावस्थाः भवन्ति। तासामवस्थानां नामानुसारं फलं भवति। चन्द्रस्य द्वादश–अवस्थानां नामानि – 1. प्रवासः 2. नाशः 3. मरणम् 4. जयः 5. हास्यम् 6. रतिः 7. क्रीडा 8. सुप्तः 9. भुक्तः 10. ज्वरः 11. कम्पः 12. स्थिरता।

अथवा

**प्रश्नः – ग्रहदोषनिवारणार्थं औषधिस्नानस्य दानस्य च वर्णनं कुरूत ?**

उत्तरम् – लाजाकुष्ठबलाप्रियंगुघनसिद्धार्थैः, निशादारूभिः पुङ्खालोध्रयुतैः अर्थात् (धानस्य लावा–कूठ–बरियार्–ककूनी–पोस्ता(अफीमबीजः)–पीतसरसों–हल्दी–देवदारूः–शरफोंका–लोधानां च एतासाम् औषधीनाम जले सम्मील्य स्नानकरणेन ग्रहजनितदोषाः दूरीभवन्ति।

तथा च ग्रहदोषशान्त्यर्थं दानं करणीयम् यथा रविग्रहस्य शान्त्यर्थं सवत्सा गौ, चन्द्रे शङ्खः, मङ्गलग्रहे रक्त्वर्णीयः बृषभः, बुधग्रहे सुवर्णम्, गुरौ पीतवस्त्रम्, शुक्रे उज्ज्वलवस्त्रम्, शनिग्रहे कृष्णवर्णीया गौ, राहुग्रहे खडगः, (तलबार) केतौ च अजा/अजः ग्रहशान्त्य दानं करणीयम्।

**प्रश्नः 17 – रजस्वलानन्तरं स्नानमुहूर्तं वर्णयत् ?** 03

उत्तरतम् – हस्त–स्वाती–अश्विनी–मृगशिरा–अनुराधा–धनिष्ठा–ज्येष्ठा तथा ध्रुवसंज्ञकनक्षत्रेषु शुभतिथिषु शुभवासरेषु च प्रथमरजोवत्याः स्नानं शुभं भवति। मृगशिरा–रेवती–स्वाती–अश्विनी–रोहिणी च एतेषु नक्षत्रेषु स्नानेन रजोवती शीघ्रगर्भधारणं करोति।

अथवा

प्रश्नः – गर्भाधानमुंहूर्तस्य वर्णनं कुरूत ?
उत्तरम् – भद्रा, षष्ठी तिथिः, पर्वदिनानि, चतुर्दशी–अष्टमी–अमावस्या–पूर्णिमा एवं संक्रान्तिकालं रिक्तातिथयः सन्ध्याकालं तथा च भौम–रवि–शनिवासरं च गर्भधारणे त्याज्याः भवन्ति। तथा च रजोदर्शनात् चतस्त्रः रात्रयः त्याज्याः भवन्ति।
उत्तरात्रयाणि नक्षत्राणि तथा मृगशिरा, हस्तः, अनुराधा, रोहिणी, स्वाती, श्रवण, धनिष्ठा, शतभिषा इत्येतेषु नक्षत्रेषु शुभवारेषु, शुभनक्षत्रेषु शुभतिथिषु शुभलग्नेषु शुभयोगेषु च गर्भाधारणं शुभं भवति।

**दीर्घोत्तरीयप्रश्नाः –**

**प्रश्नः 18– रव्यादिवारेषु नक्षत्रयोगवशात् सवार्थसिद्धियोगस्य विवेचनं कुरूत ?** 04
उत्तरम् – रविवासरे यदि हस्त–मूल–उत्तरात्रयनक्षाणि–पुष्य–अश्विनीनक्षत्रं च भवति चेत् सर्वार्थसिद्विः योगः भवति। एवमेव प्रकारेण सोमवासरे श्रवण–रोहिणी–मृगशिरा–पुष्य–अनुराधा। भौमवासरे अश्विनी–उत्तराभाद्रपद–कृत्तिका–आश्लेषा। बुधवासरे रोहिणी–अनुराधा–हस्त–कृत्तिका–मृगशिरा। बृहस्पतिवासरे रेवती–अनुराधा–अश्विनी–पुनर्वसु–पुष्य। शुक्रवासरे रेवती अनुराधा–अश्विनी–पुनर्वसु–श्रवण। शनिवासरे श्रवण–रोहिणी–स्वाती नक्षत्राणि भवन्ति चेत् सर्वार्थसिद्धियोगो भवति।

अथवा

**प्रश्नः – सूर्यादिवारेषु दुष्टमुहूर्तानां (कलांशानां) वर्णनं कुरूत ?**
उत्तरम् – दिनमानस्य षोडशात्मकः भागः एकः कलांशः भवति। तदनुसारं प्रति वासरानुसारं संख्या द्वारा दुष्टकलांशानां वर्णनं कृतमस्ति।
यथा रविवासरे 6। 7। 8। 10। 14 कलांशाः, सोमवासरे 4। 6। 8। 9। 12। 13 14 कलांशाः, भौमवासरे 2। 4। 3। 6। 10 कलांशाः, बुधवासरे 2। 4। 8। 9। 10। 14 कलांशाः, गुरूवासरे 2। 6। 12। 14। 15। 16 कलांशाः, शुक्रवासरे 4। 5। 6 । 9। 10। 12। 14 कलांशाः तथा शनिवासरे 1। 2। 8। 10। 11। 12 कलांशाः दुष्टक्षणाः दुष्टमुहूर्ताः भवन्ति। एतेषु सर्वेषु मुहूर्तेषु कण्टक–कालवेला–अर्धयाम–यमघण्टादि दोषेषु कोऽपि दोषः भवति एव। अस्मात् कारणात् शुभकार्येषु वर्जिताः सन्ति एते कलांशाः।

**प्रश्नः 19 – औषधिनिमार्णस्य भक्षणस्य च मुहूर्तं वर्णयत ?** 04
उत्तरम् – लघुसंज्ञकहस्त–अश्विनी–पुष्याभिजितेषु, मृदुसंज्ञकमृगशिरा–रेवती–चित्रानुराधानक्षत्रेषु, चरसंज्ञकस्वाती–पुनर्वसु–श्रवण–धनिष्ठा–शतभिषा तथा मूलनक्षत्रे, द्विस्वभावलग्ने सोम–बुध–गुरू–शुक्र–रविवासरेषु, लग्नात् द्वादश–सप्तम–अष्टमस्थाने शुद्धे सती शुभतिथिषु औषधेः सेवनं निर्माणं च करणीयम्। एतेन शुभफलं लभते। औषधिसेवनं निमार्णं च जन्मनक्षत्रे अशुभो भवति।

अथवा

**प्रश्नः – अग्निवासज्ञानं कथं करणीयं फलसहितं विवेचनं कुरूत ?**
उत्तरम् – यस्मिन् दिने तिथौ च हवनादिकर्म करणीयमस्ति तदा शुक्लपक्षप्रतिपदातिथितः आरभ्य वर्तमानतिथिपर्यन्तं तिथिसंख्या तथा रविवारतः वर्तमानदिनपर्यन्तं दिनसंख्या उभयोः संयोजनं कृत्वा तस्मिन् पुनः 01 संख्यायाः संयोजनं कृत्वा योगफलं 04 संख्यायाः आप्तकरणेन (भागकरणेन) यदि लब्धिः 00 अथवा 03 आगच्छति चेत् पृथिव्योपरि अग्नेः वासः भवति। लब्धिः 01 आगच्छति चेत् आकाशे अग्नेः वासः भवति। लब्धिः 02 आगच्छति चेत् अग्नेः वासः पाताले भवति। यदा अग्निवासः पृथिव्यां भवति तदा हवनादिकर्मकरणेन सुखं भवति। आकाशे अग्निवासे प्राणनाशः तथा पाताले अग्निवासे धनहानिः भवति।

**प्रश्नः 20 – ऊर्ध्वमुख–अधोमुख–तिर्यङ्मुखनक्षत्राणि कानि इति स्पष्टयत ?** 04
उत्तरम् – मूल–आश्लेषा–कृतिका–विशाखा–पूर्वात्रयनक्षत्राणि भरणी मघा च एतानि अधोमुखसंज्ञकानि भवन्ति। आर्द्रा–पुष्य–श्रवण–धनिष्ठा–शतभिषा–रोहिणी–उत्तरात्रयनक्षत्राणि च ऊर्ध्वमुखसंज्ञकानि भवन्ति। मृगशिरा– रेवती– चित्रा– अनुराधा– हस्त– स्वाती– पुनर्वसु– ज्येष्ठा– अश्विनी च एतानि नक्षत्राणि तिर्यङ्मुखसंज्ञकानि भवन्ति।

अथवा

**प्रश्नः – लघुसंज्ञक–मृदुसंज्ञक–चरसंज्ञक–नक्षत्राणां फलसहितं विवेचनं कुरूत ?**

**उत्तरम् – लघुसंज्ञकनक्षत्राणि** – हस्त–अश्विनी–पुष्य–अभिजित् नक्षत्राणि तथा गुरूवासरः क्षिप्रसंज्ञको तथा च लघुसंज्ञको भवति। एतेषु पण्यकार्यम्, रति–ज्ञानम्, आभूषणम्, शिल्पकलादि कार्याणि शुंभानि भवन्ति।

**मृदुसंज्ञकानि** – मृगशिरा, रेवती, चित्रा, अनुराधा, रविवासरं च एतानि मृदुसंज्ञकानि मैत्रसंज्ञकानि च नक्षत्राणि सन्ति। एतेषु नक्षत्रेषु गीतसंगीतादि, वस्त्रनिमार्ण–क्रय–विक्रयादि, क्रीडासम्बन्धी – कार्याणि मित्रकार्याणि, आभूषणनिर्माण–धारणादि–कार्याणि, शुभानि भवन्ति। उक्तं च –

**मृगान्त्याचित्रामित्रर्क्षं मृदु मैत्रं भृगुस्तथा।**
**तत्र गीताम्बरक्रीडा मित्रकार्यविभूषणम्।।**

**चरसंज्ञकानि नक्षत्राणि** – स्वाती, पुनर्वसु, श्रवण, धनिष्ठा, शतभिषा नक्षत्राणि तथा सोमवासरः चरसंज्ञको भवति। एतेषु गजारोहणम् अश्वारोहणं पुष्पवाटिकादि निर्माणं तथा यात्रादि कार्याणि तथा च लघुसंज्ञकनक्षत्रेषु उक्तानि कार्याणि शुभानि भवन्ति।

**प्रश्नः 21 – विद्यारम्भमुहूर्तस्य वर्णनं विस्तारेण कुरूत ?** 04

उत्तरम् – मृगशिरा आर्द्रा पुनर्वसु  हस्त चित्रा स्वाती श्रवण धनिष्ठा शतविषा अश्विनी मूल पूर्वात्रयं पुष्य आश्लेषा नक्षत्रेषु, रवि–बुध–गुरू–शुक्रवासरेषु द्वितीया–तृतीया–पंचमी–षष्ठी–दशमी–एकादशी–द्वादशी तिथिषु केन्द्रे त्रिकोणे च शुभग्रहाणां स्थिते विद्यारम्भमुहूर्तः शुभः भवति। अन्ये आचार्यः कथयन्ति यत् ध्रुवसंज्ञकनक्षत्रेषु रेवती अनुराधायां चापि विद्यारम्भः शुभो भवति।

अथवा

**प्रश्नः – लग्नशुद्धिसहितं व्रतवन्धमुहूर्तस्य वर्णनं विस्तारेण कुरूत ?**

उत्तरम् – क्षिप्रसंज्ञक–ध्रुवसंज्ञकनक्षत्रेषु चरसंज्ञकन्क्षत्रेषु मृदुसंज्ञकनक्षत्रेषु तथा च आश्लेषा– मूल– आर्द्रा त्रयेषु पूर्वानक्षत्रेषु, रवि–सोम–बुध–गुरू–शुक्रवासरेषु, द्वितीया–पंचमी–एकादशी द्वादशीतिथिषु, शुक्लपक्षपंचमीतः कृष्णपक्षस्य पंचमी पर्यन्तं व्रतबन्धंसंस्कारो शुभो भवति। व्रतबन्धं पूर्वाह्णे एव शुभो भवति। अपराह्णे च शुभो न भवति।

**व्रतबन्धे लग्नशुद्धिः** – उपनयनसमये लग्नात् षष्टाष्टद्वादशभावेभ्यः प्रथक् शुभग्रहाः स्युः। तथा च तृतीय–षडेकादशभावेषु पापग्रहाः भवेयुः तथा च पूर्णचन्द्रः वृषाथवा कर्कराश्यां स्थितो भूत्वा लग्ने स्यात् तदा उपनयनसंस्कारः शुभो भवति।

**विश्लेषणात्मकप्रश्नाः –**

**प्रश्नः 22 – भद्रायाः परिचयपूर्वकं फलसहितं भ्रदावासस्य वर्णनं कुरूत ?** 05

उत्तरम् – शुक्लपक्षे अष्टम्यां पूर्णिमायां च पूर्वार्धे, तथा एकादशस्यां चतुर्थ्यां च परार्धे भद्रा भवति। कृष्णपक्षे तृतीयायां दशम्यां च उत्तरार्धे, तथा च सप्तम्यां चतुर्दश्यां च पूर्वार्धे भद्रा भवति। विष्टिकरण मेव भद्रा भवति।

**भद्रावासः –**

**कुम्भकर्कद्वये मर्त्ये स्वर्गेऽब्जेऽजात्त्रयेऽलिगे।**
**स्त्रीधनुर्जूकनक्रेऽधो भद्रा तत्रैव तत्फलम्।।**

अर्थात् कुम्भमीनकर्कसिंहराशिषु यदि चन्द्र भवति चेत् भद्रा मर्त्यलोके (मृत्युलोके) निवसति। मेष–वृष–मिथुन–वृश्चिकराशिषु यदि चन्द्रा भवति चेत् भद्रा स्वर्गे निवसति। तथा च  कन्या तुला धनु मकर राशिषु यदि चन्द्रो भवति चेत् भद्रावासः पाताले भवति। यत्र यत्र भद्रा वासः करोति तत्र तत्र तस्याः फलं भवति।

अथवा

**प्रश्नः – चैत्रादिमासपरत्वेन शून्यनक्षत्राणां विवेचनं कुरूत  ?**

उत्तरम् –  भाद्रपदमासे प्रतिपदा द्वितीया, श्रावणमासे तृतीया द्वितीया, वैशाखमासे द्वादशी, पौषमासे चतुर्थी पंचमी, आश्विनमासे दशमी एकादशी, मार्गशीर्षमासे सप्तमी अष्टमी, चैत्रमासे नवमी, अष्टमी च

एताः तिथयः कृष्णशुक्लौ इति पक्षे द्वये शून्याः भवन्ति। अथ च कार्तिक–आषाढ़–फाल्गुन–ज्येष्ठ–माघमासेषु कृष्णपक्षे क्रमशः पंचमी–षष्ठी–चतुर्थी–चतुर्दशी–पंचमी च एताः तिथयः शून्याः भवन्ति। तथा च शुक्लपक्षे क्रमशः चतुर्दशी–सप्तमी–तृतीया–त्रयोदशी–षष्ठी च एताः तिथयः शून्याः भवन्ति।

**प्रश्नः 23 – सीमन्तसंस्कारमुहूर्तपूर्वकं विष्णुपूजा पुंसवनमुहुर्तस्य च वर्णनं कुरूत ?** **05**

उत्तरम् – सीमन्तसंस्कारमुहूर्तम् – रवि–भौम–गुरूवासरेषु मृगशिरा–पुष्य–मूल–श्रवण–पुनर्वसु–हस्त–रेवतीनक्षत्रेषु, ध्रुवंज्ञकनक्षत्रेषु रिक्ता–अमावस्या–द्वादशी–षष्ठी–अष्टमीतिथीन् त्यक्त्वा अन्यशुभतिथिषु, बलयुक्ते मासेश्वरे सति, गर्भाधानात् षष्ठे अष्टमे वा मासे केन्द्रत्रिकोणेषु शुभग्रहाणां स्थिते त्रिषडायेषु पापग्रहे सति पुरूषग्रहस्य लग्ने नवांशे च सति सीमन्तसंस्कारः शुभो भवति।

**पुंसवनमुहूर्त्तं विष्णुपूजा च –**

उक्तसीमान्तसंस्कारे वर्णितमुहूर्त्ते गर्भाधानसंस्कारात् तृतीये मासे पुंसवनसंस्कारः भवति। तथा च अष्टमे मासे श्रवण–रोहिणी–पुष्यनक्षत्रेषु लग्ने शुभग्रहे सति, पापग्रहरहिते अष्टमस्थाने च भगवद्विष्णुपूजा शुभो भवति।

**अथवा**

**प्रश्नः – लग्नशुद्धिः सहितं कर्णभेदसंस्कारस्य वर्णनं विशद्रूपेण कुरूत ?**

उत्तरम् – चैत्रमासं पौषमासं क्षयतिथिं हरिशयशनकालं (आषाढ़शुक्ल एकादशीतः कार्तिकशुक्ल एकादशी पर्यन्तम्) जन्ममासं रिक्तातिथिं समवर्षं जन्मतारां च वर्जयित्वा जन्मदिनात् षष्ठे सप्तमे अष्टमे वा मासे बुध–गुरू–शुक्र–सोमवासरेषु विषमवर्षेषु श्रवण धनिष्ठा पुनर्वसु तथा मृदुसंज्ञक लघुसंज्ञकनक्षत्रेषु कर्णवेभसंस्कारः शुभो भवति।

लग्नशुद्धिः – केन्द्रे त्रिकोणे च शुभग्रहाणां स्थिते तथा त्रिषडाये पापग्रहाणां स्थिते एवं च अष्टमस्थानसंशुद्धे सती कर्णभेदसंस्कारः शुभो भवति।

।। इति ।।